# Prashnottara Maniratnamala

# પ્રશ્નોત્તર મણિરત્નમાલા

## Document Information

Text title : maniratnamala (aka Prashnottari-maniratnamala)

File name : maniratnamala.itx

Category : stotra, shankarAchArya, advice

Location : doc_z_misc_shankara

Author : Attributed to Adi Shankaracharya

Transliterated by : sunder hattangadi

Proofread by : sunder hattangadi

Description-comments : 32 verses on conduct conducive to liberation

Latest update : Jan. 2, 2014

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 11, 2020

*sanskritdocuments.org*

# પ્રશ્નોત્તર મણિરત્નમાલા

અપારસંસારસમુદ્રમધ્યે
    નિમજ્જતો મે શરણં કિમસ્તિ ।
ગુરો કૃપાલો કૃપયા વદૈત-
    દ્વિશ્વેશપાદામ્બુજદીર્ઘનૌકા ॥ ૧॥

બદ્ધો હિ કો યો વિષયાનુરાગી
    કો વા વિમુક્તો વિષયે વિરક્તઃ । વિષયૈર્વિમુક્તઃ
કો વાઽસ્તિ ઘોરો નરકઃ સ્વદેહ-
    સ્તૃષ્ણાક્ષયઃ સ્વર્ગપદં કિમસ્તિ ॥ ૨॥

સંસારહૃત્કસ્તુ નિજાત્મબોધઃ
    કો મોક્ષહેતુઃ પ્રથિતઃ સ એવ ।
દ્વારં કિમેકં નરકસ્ય નારી
    કા સ્વર્ગદા પ્રાણભૃતામહિંસા ॥ ૩॥

શેતે સુખં કસ્તુ સમાધિનિષ્ઠો
    જાગર્તિ કો વા સદસદ્વિવેકી ।
કે શત્રવઃ સન્તિ નિજેન્દ્રિયાણિ
    તાન્યેવ મિત્રાણિ જિતાનિ કાનિ ॥ ૪॥

કો વા દરિદ્રો હિ વિશાલતૃષ્ણઃ
    શ્રીમાંશ્ચ કો યસ્ય સમસ્તતોષઃ ।
જીવન્મૃતો કસ્તુ નિરુદ્યમો યઃ
    કોવાઽમૃતઃ સ્યાત્સુખદા નિરાશા ॥ ૫॥

પાશો હિ કો યો મમતાભિધાનઃ
    સંમોહયત્યેવ સુરેવ કા સ્ત્રી ।
કો વા મહાન્ધો મદનાતુરો યો
    મૃત્યુશ્ચ કો વાપયશઃ સ્વકીયમ્ ॥ ૬॥

કો વા ગુરુર્યો હિ હિતોપદેષ્ટા
    શિષ્યસ્તુ કો યો ગુરુ ભક્ત એવ ।
કો દીર્ઘ રોગો ભવ એવ સાધો
    કિમૌષધિં તસ્ય વિચાર એવ ॥ ૭॥

કિં ભૂષણાદ્ભૂષણમસ્તિ શીલં
    તીર્થં પરં કિં સ્વમનો વિશુદ્ધમ્ ।
કિમત્ર હેયં કનકં ચ કાન્તા
    શ્રાવ્યં સદા કિં ગુરુવેદવાક્યમ્ ॥ ૮॥

કે હેતવો બ્રહ્મગતેસ્તુ સન્તિ
    સત્સઙ્ગતિર્દાનવિચારતોષાઃ । શાન્તિવિચારતોષાઃ
કે સન્તિ સન્તોઽખિલવીતરાગાઃ
    અપાસ્તમોહાઃ શિવતત્ત્વનિષ્ઠાઃ ॥ ૯॥

કો વા જ્વરઃ પ્રાણભૃતાં હિ ચિન્તા
    મૂર્ખોઽસ્તિ કો યસ્તુ વિવેકહીનઃ ।
કાર્યા મયા કા શિવવિષ્ણુભક્તિઃ
    કિં જીવનં દોષવિવર્જિતં યત્ ॥ ૧૦॥

વિદ્યા હિ કા બ્રહ્મગતિપ્રદા યા
    બોધો હિ કો યસ્તુ વિમુક્તિ હેતુઃ । બોધોઽસ્તિ
કો લાભ આત્માવગમો હિ યો વૈ
    જિતં જગત્કેન મનો હિ યેન ॥ ૧૧॥

શૂરાન્મહાશૂરતમોઽસ્તિ કો વા
    મનોજબાણૈર્વ્યથિતો ન યસ્તુ ।
પ્રાજ્ઞોઽતિધીરશ્ચ સમોઽસ્તિ કો વા
    પ્રાપ્તો ન મોહં લલનાકટાક્ષૈઃ ॥ ૧૨॥

વિષાદ્વિષં કિં વિષયાઃ સમસ્તા
    દુઃખી સદા કો વિષયાનુરાગી ।
ધન્યોઽસ્તિ કો યસ્તુ પરોપકારી
    કઃ પૂજનીયો નનુ તત્ત્વનિષ્ઠઃ ॥ ૧૩॥

સર્વાસ્વવસ્થાસ્વપિ કિં ન કાર્યં

કિંવા વિધેયં વિદુષાં પ્રયત્નાત્ ।
સ્નેહશ્ચ પાપં પઠનં ચ ધર્મઃ
સંસારમૂલં હિ કિમસ્તિ ચિન્તા ॥ ૧૪॥

વિજ્ઞાન્મહાવિજ્ઞતમોઽસ્તિ કો વા
નાર્યા પિશાચ્યા ન ચ વઞ્ચિતો યઃ ।
કા શ‍ૃઙ્ખલા પ્રાણભૃતાં ચ નારી
દિવ્યં વ્રતં કિં ચ નિરસ્તદૈન્યમ્ ॥ ૧૫॥

જ્ઞાતું ન શક્યં હિ કિમસ્તિ સર્વૈ-
ર્યોષિન્મનો યચ્ચરિતં તદીયમ્ ।
કા દુસ્ત્યજા સર્વજનૈર્દુરાશા
વિદ્યાવિહીનઃ પશુરસ્તિ કો વા ॥ ૧૬॥

વાસો ન સઙ્ગઃ સહ કૈર્વિધેયો
મૂર્ખૈશ્ચ નીચૈશ્ચ ખલૈશ્ચ પાપૈઃ ।
મુમુક્ષુણા કિં ત્વરિતં વિધેયં
સત્સઙ્ગતિર્નિર્મમતેશ ભક્તિઃ ॥ ૧૭॥

લઘુત્વમૂલં ચ કિમર્થિતૈવ
ગુરુત્વબીજં યદયાચનં કિમ્ ।
જાતોઽસ્તિ કો યસ્ય પુનર્ન જન્મ
કો વાઽમૃતો યસ્ય પુનર્ન મૃત્યુઃ ॥ ૧૮॥

મૂકોઽસ્તિ કો વા બધિરશ્ચ કો વા
વક્તું ન યુક્તં સમયે સમર્થઃ ।
તથ્યં સુપથ્યં ન શ‍ૃણોતિ વાક્યં
વિશ્વાસપાત્રં ન કિમસ્તિ નારી ॥ ૧૯॥

તત્ત્વં કિમેકં શિવમદ્વિતીયં
કિમુત્તમં સચ્ચરિતં યદસ્તિ ।
કિં કર્મ કૃત્વા ન ચ શોચનીયઃ
કામારિકંસારિસમર્ચનાખ્યમ્ ॥ ૨૦॥

શત્રોર્મહાશત્રુ તમોઽસ્તિ કો વા
કામઃસકોપાનૃતલોભતૃષ્ણઃ ।
ન પૂર્યતે કો વિષયૈઃ સ એવ

કિં દુઃખમૂલં મમતાભિધાનમ્ ॥ ૨૧॥

કિં મણ્ડનં સાક્ષરતા મુખસ્ય
સત્યં ચ કિં ભૂતહિતં તદેવ ।
ત્યક્ત્વા સુખં કિં સ્ત્રિયમેવ સમ્યક્
દેયં પરં કિં ત્વભયં સદૈવ ॥ ૨૨॥

કસ્યાસ્તિ નાશે મનસો હિ મોક્ષઃ
ક્વ સર્વથા નાસ્તિ ભયં વિમુક્તૌ ।
શલ્યં પરં કિં નિજમૂર્ખતૈવ
કે કે હ્યુપાસ્યા ગુરુવશ્ચ વૃદ્ધાઃ ॥ ૨૩॥

ઉપસ્થિતે પ્રાણહરે કૃતાન્તે
કિમાશુ કાર્યં સુધિયા પ્રયત્નાત્ ।
વાક્કાયચિત્તૈઃ સુખદં યમઘ્નં var હૃદ્બુદ્ધિચિત્તૈઃ
મુરારિપાદામ્બુજમેવ ચિન્ત્યમ્ ॥ ૨૪॥

કે દસ્યવઃ સન્તિ કુવાસનાખ્યાઃ
કઃ શોભતે યઃ સદસિ પ્રવિદ્યઃ ।
માતેવ કા યા સુખદા સુવિદ્યા
કિમેધતે દાન વશાત્સુવિદ્યા ॥ ૨૫॥

કુતો હિ ભીતિઃ સતતં વિધેયા
લોકાપવાદાદ્ભવકાનનાચ્ચ ।
કો વાસ્તિ બન્ધુઃ પિતરૌ ચ કૌ વા
વિપત્સહાયઃ પરિપાલકૌ યૌ ॥ ૨૬॥

બુદ્ધ્યા ન બોધ્યં પરિશિષ્યતે કિં
શિવ પ્રશાન્તં સુખ બોધ રૂપમ્ ।
જ્ઞાતે તુ કસ્મિન્ વિદિતં જગત્સ્યા-
ત્સર્વાત્મકે બ્રહ્મણિ પૂર્ણ રૂપે ॥ ૨૭॥

કિં દુર્લભં સદ્ગુરુરસ્તિ લોકે
સત્સઙ્ગતિર્બ્રહ્મવિચારણા ચ ।
ત્યાગો હિ સર્વસ્ય નિજાત્મબોધઃ var શિવાત્મબોધઃ
કિં દુર્જયં સર્વજનૈર્મનોજઃ ॥ ૨૮॥

પશોઃ પશુઃ કો ન કરોતિ ધર્મં
    પ્રાધીતશાસ્ત્રોઽપિ ન ચાત્મબોધઃ ।
કિં તદ્વિષં ભાતિ સુધોપમં સ્ત્રી
    કે શત્રવો મિત્રવદાત્મજાદ્યાઃ ॥ ૨૯ ॥

વિદ્યુચ્ચલં કિં ધન યૌવનાયુ-
    ર્દાનં પરં કિં ચ સુપાત્ર દત્તમ્ ।
કણ્ઠે ગતેરપ્યસુભિર્ન કાર્યં
    કિંવા વિધેયં મલિનં શિવાર્ચા ॥ ૩૦ ॥

કિં કર્મ યત્પ્રીતિકરં મુરારેઃ
    ક્વાસ્થા ન કાર્યા સતતં ભવાબ્ધૌ ।
અહર્નિશં કિં પરિચિન્તનીયં
    સંસારમિથ્યાત્વશિવાત્મતત્ત્વમ્ ॥ ૩૧ ॥

કણ્ઠં ગતા વા શ્રવણં ગતા વા
    પ્રશ્નોત્તરાખ્યા મણિરત્નમાલા ।
તનોતુ મોદં વિદુષાં પ્રયત્નાત્
    રમેશગૌરીશપદૌ સુસેવ્યૌ ॥ ૩૨ ॥

ઇતિ શ્રીમુક્તીન્દ્રશઙ્કરમિશ્રવિરચિતા મણિરત્નમાલા સમાપ્તા ।

Encoded and proofread by Sunder Hattangadi

Thirtytwo Catechetical Verses on Morals and Religion

by Shankaracharya

Maynot be correctly attributed to Shankaracharya

*Prashnottara Maniratnamala*

pdf was typeset on December 11, 2020

Please send corrections to *sanskrit@cheerful.com*